CC-0. In Public Domain. Digitization by eGangotri

द्रव्यवर्णोऽप्यजादेः स्याद्रक्तः श्वेतः शुकाङ्गवत् ।
पाटलो धूम्रको नाना सितकृष्णौ तुलोदितौ ॥ १५ ॥

द्रव्यतस्करसङ्ख्याः स्युः सूर्यादेर्दृष्टियोगतः ।
रश्मिभिर्नागहारौ हि ते धीः सा लोक रत्न रुक् ॥ १६ ॥

अर्कारसौम्यदृष्टेन्दुर्भुगतं क्रमतः परैः ।
लम्बितं जलगं वायुसहिते देश एव च ॥ १७ ॥

आरूढवस्तुरचिते चन्द्रे दृष्टे न केनचित् ।
धातुर्मूलं च जीवश्च चराद्या राशयः स्मृताः ॥ १८ ॥

(चित्रश्वेतेति ? द्रव्येति) । अजादेर्वर्णो (दि ? द्र)व्यवर्णः । मेषस्य रक्तवर्ण इत्यादि । तुलायाः सितः कृष्णश्च । स्वर्णवर्णासिताविति । स्वर्णवर्णोऽसितवर्णश्च वृश्चिकस्येत्यादि ॥

द्रव्येति । आरूढे सूर्यस्य योगो दृष्टिर्वा नाग इति । सूर्यरश्मितुल्यद्रव्यसङ्ख्या तस्करसङ्ख्या च । चन्द्रस्य हार इति । कुजस्य हि । राहोः रत्न । केतोः रुक् ॥

अर्कारेति । अर्कौर्यैर्दृष्टश्चन्द्रश्चेद् धनं भूगतम् । परैर्जीवाद्यैः । जीवदृष्टश्चेल्लम्बितमित्यादि ॥

आरूढेति । चन्द्रे केनचिन्न दृष्टे आरूढं चरराशिश्चेद् धातुरचिते पात्रे इत्यादि ॥

CC-0. In Public Domain. Digitization by eGangotri

कर्माणि मेषघटसिंहधनूंषि भोगा
गोस्त्रीतुलाश्च परभानि विनाशनानि ।
चन्द्रारराहुशनयोऽर्कसितौ विदार्यौ
धात्वादयोऽश्विमुखभानि भवन्नवांशाः ॥ १९ ॥

कर्मोचिता भोगकरा विनाशा
धात्वादयोंऽशाः क्रमतो द्रगाणे ।
ओजे चराद्या नवभागसंज्ञा
धात्वादयोऽप्युत्क्रमतश्च युग्मे ॥ २० ॥

धात्वादिराशौ तु तदंशतारा
तत्खेटदृग्योगत एवमत्र ।

कर्माणीति । मेषादयः (कर्मा? कर्मो)चिताः । मिथुनादय अनुभवाः । अन्ये विनाशाः । मेषराशिरारूढं चेन्नष्टवस्तुभिः क्रयविक्रयादि करोति । मिथुनं चेदनुभुज्यते चोरैरित्यर्थात् । विनाशराशिरारूढं चेद् हृतं वस्तु । (नवन? भवन्न)वांशा अपि भवद्राशिव(त्पात्रं? द् वात्र) कर्मादि । अश्विनी धातुः कर्म । भरणी मूलं वृषराशिवद् विनाशः । कृत्तिका जीवः मिथुनवदित्यादि भोगः ॥

कर्मोचितेति । प्रथमद्रेक्काणे त्रयो नवांशाः धातुमूलजीवाः ते कर्मोचिता एव । द्वितीये त्रयः धात्वादयः भोगकराः । तृतीये त्रयः धात्वादयः विनाशाः । पक्षभेदः एवमोजे नवांशाः चराद्या धात्वादयः । युग्मे प्रतिलोमेन जीवमूलधातवः ॥

CC-0. In Public Domain. Digitization by eGangotri

धात्वाख्यधातुश्च तदाख्यमूलं
ततसंज्ञजीवः क्रमतः परेषु ॥ २१ ॥

धात्वादि मृत्सा[1]विकृतिः समस्तं
धात्वाख्यधातुस्तु नि(शि ? धि)श्च कन्दम् ।
धात्वाख्यमूलं प्रतिमा समस्ता
धात्वाख्यजीवश्च कृता मृदाद्यैः ॥ २२ ॥

स्थावरं तत्फलं मूलमूलं वसनशर्करे ।
शुष्कवृक्षादि दग्धं च पक्वं मूलाख्यधातवः ॥ २३ ॥

नीडकोटरगोष्ठौकःपुत्रिका मूलजीवकाः ।

धात्वादीति । धातुराशावारूढे धातुनवांशधातुः धातुग्रहे योगादिश्चेद् धात्वाख्यधातुर्नष्टः । मूलनवांशाद्युदये धातुर्जीवः । परेष्वेवमेव । मूलराशौ मूलांशाद्युदये मूलमूलं मूलधातुः मूलजीवः । जीवराशौ जीवजीव इत्यादि नवधा ॥

धात्वादीति । धात्वाख्यधातुः ताम्रादि । आदिशब्देन रजतसुवर्णाद्यपि तत्सर्वं मृद्विकार एव । धात्वाख्यमूलं निक्षिप्तधनम् कन्दं भूम्यन्तर्गतम् । धात्वाख्यजीवः ताम्रादिकृता प्रतिमा ॥

स्थावरमिति । स्थावरं वृक्षलतादि । तत्फलं मूलमूलम् । वस्त्रं शर्करा शुष्कवृक्षादि दग्धवस्तु पक्कवस्तु मूलधातुः ।

---

१. 'त्सा' ख.

CC-0. In Public Domain. Digitization by eGangotri

गजादिस्था शिशोर्वोढा गर्भिण्यो जीवजीवकाः ॥ २४ ॥

मेषो धातुः सुवर्णादिपात्रदीपपणाश्च गौः ।
मूलं तन्तुकृतं सर्वं चन्दनं चोपधादि च ॥ २५ ॥

वीणा जीवः सर्पदंशा मक्षिका मूषिकादयः ।
क्रूरा मृगाः कर्कटैणौ धातू चायसमायुधम् ॥ २६ ॥

सिंहो मूलं तु ताम्बूलकन्दव्रीहिफलानि च ।
कन्या जीवः स्त्रियश्चापि भक्ष्याश्च मृगजातयः ॥ २७ ॥

नीडेति । ओको गृहं येषां तेषां पुत्रिका कृत्रिमरूपम् तच्च नीडादि च मूलजीवः गजाश्वादिवाहनस्थाः शिशुवाहकाः गर्भिणी च जीवजीवः । दग्धधामिति । दग्धवस्तु शवम् अस्थि जीवधातुः । रोमनखादि जीवमूलम् । अत्र वस्त्रं मृगरोमकृतम् । पूर्वत्र कार्पासादिस्थावरविकारकृतम् ॥

मेष इति । मेषो धातुराशिः तस्मिन्नारूढे सुवर्णरजतादिकृतः (वर्णः ? पणः) पात्रं दीपम् । गौ(र्वि ? र्वृ)राशिः मूलं तस्मिन्नारूढे तन्तुकृतं वस्त्रशय्याशिरस्त्राणकवचोपधानादिकं चन्दनं च ॥

वीणा जीव इति । कर्कटको मृगश्च धातुराशी । ताम्र्यामयसा कृतं खड्गादि ॥

सिंह इति । सिंहराशिर्मूलं व्रीह्यादिश्यामाकनीवारमुद्गादि कन्दं कदळीपनसाम्रादिफलं च । कन्या जीवराशिः स्त्रियः भक्षणयोग्या मृगादयश्च ॥

CC-0. In Public Domain. Digitization by eGangotri

तुला धातुस्त्वचस्तत्र दध्यादिद्रव्यकम्बले ।
अलिर्मूलं तु धीभ्रंशहेतुवृक्षलतादि च ॥ २८ ॥

नराश्च दन्तिनश्चापपूर्वोऽन्यो बर्हिकुक्कुटौ ।
हरिवद् घटभं मीनो वीणावज्जलजा अपि ॥ २९ ॥

आरूढलग्नभागाभ्यां द्रव्यं चोरहृतं वदेत् ।
चतुर्भागैश्च धात्वादिर्मृतं चान्त्यभं[1] स्मृतम् ॥ ३० ॥

यत्र ग्रहस्त्रिभागैर्धात्वाद्या इति माधवः ।
नरर्क्षे भूषणानि स्युर्धातुर्न्यंशे ग्रहो यदि ॥ ३१ ॥

तुलेति । धीभ्रंशहेतुसाधनं मद्यादि उन्मत्तदुरालभादि ॥

नराइति । चापपूर्वार्धेन नरादयः । अपरार्धेन मयूरः कुक्कुटश्च सिंहराशिवद् घटराशिः । मिथुनवन्मीनो जलजन्तवश्च ॥

आरूढेति । पूर्वोदितवस्तूनि आरूढलग्नयोर्बलवतः अंशेन चोरहृतानि वदेत् । अत्र च लग्नारूढयोः चत्वारोंशाः कल्प्याः । पूर्वादि धात्वादि अन्त्यं मृतमिति च ॥

यत्रेति । आरूढे यस्मिन् द्रेक्काणे ग्रहस्तद्द्रेक्काणेन धात्वादिश्चिन्त्यः । नरराशावारूढे धातुद्रेक्काणे ग्रहो यदि भूषणानि । तत्र 'कं दृक्क्षेत्रे'त्यादिहोरोक्ताङ्गनिभक्तकल्पनायां यदङ्गमुदितं तदङ्गभूषणम् । तत्रापि 'कालाङ्गे'त्यादि मेषत आरभ्य चिन्त्यम् ॥

---

१. 'मविस्मृ' ख.

CC-0. In Public Domain. Digitization by eGangotri

जलर्क्षे जलपात्राणि पाकपात्राणि धातुगः ।
सर्वत्र युक्तिरश्चिन्त्यं बलाबलवशादपि ॥ ३२ ॥

लग्नेऽबलेऽस्तगाकारश्चोरस्त्र्यंशाकृतिर्बले ।
केन्द्रगेषु बलाढ्यस्य समत्वे तत्समा अपि ॥ ३३ ॥

चोराख्यो यत्र लग्नादौ ग्रहस्थाद्यास्तु तस्कराः ।
स्ववर्गे स्वयमन्यस्य सम्बन्ध्यर्यन्त्[1]यो रिपुः ॥ ३४ ॥

ग्रामेऽजगोकुम्भबुधेऽब्जवीणा
जलेऽच्छकर्कीन्दुमृगान्त्यकुम्भाः ।

जलर्क्ष इति । जलराशावारूढे धातुरेकाणे ग्रहश्चेज्जलपात्राणि पाकपात्राणि च ॥

लग्न इति । लग्नेऽबले सति समसंस्थितग्रहाकृतिश्चोरः । लग्नस्य बले सति तत्कालोदयस्त्र्यंशाकृतिः । केन्द्रगेषु समबलेषु तत्समसङ्ख्यास्तद्वदसदृशाश्चोराः । अत्र च वक्रगत्यादिभिर्गुणना च कार्या ॥

चोराख्य इति । लग्नद्वितीयादिभावेषु यत्र चोरग्रहस्तद्भावोक्त एव चोरः लग्ने चेत् । स्वयं द्वितीये चेत् कुटुम्बस्थः तृतीये भ्राता इत्यादि । तत्र स्ववर्गे चेत् सः स्वयमेव । अन्यवर्गे चेत् तत्तत्सम्बन्धी । अत्रापि भ्रात्रादिसम्बन्धः । सः कथमिति चेत् तृतीये चोरग्रहः स कुजवर्गे वा स तत्तृतीयाधिपवर्गे वा स्थितश्चेद् भ्रातुर्भ्राता इत्यायूह्यम् । अ(त्य ? र्य)न्तयोः षष्ठाष्टमयोश्चेत् शत्रुरेव चोरः ॥

---

१. 'न्त्ययो' ख.

CC-0. In Public Domain. Digitization by eGangotri

वने मृगाद्यृक्षपरग्रहाश्च
कन्यातुलाश्वा नगरे वसन्ति ॥ ३५ ॥

चोरग्रहस्थले चोरजननं तद्गृहस्थितिः ।
यस्मिंस्तद्राशिकथिते स्थले तस्करसंस्थितिः ॥ ३६ ॥

अगाधवार्स्थो वनगो नगर्यां
शशी कविर्हत्य यतोऽसृगार्किः ।
कुज्ञेऽशुचिक्ष्मावनयोर्धरेऽर्को
राहुस्तु वल्मीकतटावटस्थः ॥ ३७ ॥

ग्राम इति । राशिग्रहाणां स्थानानि । अजादीनां ग्रामं स्थानं अच्छादीनां जलम् । मृगान्त्यं मृगापरार्धम् । अन्त्यमिति द्विरावर्त्यम् । अन्त्यं मीनराशिः । मृगाद्यः मकरपूर्वभागः तदादीनां वनम् ऋक्षः सिंहः परे ग्रहाः उक्तेभ्यो बुधादि(त्यः ? भ्यः) तेषां च । कन्याद्यः नगरे । अश्वः धनुः । वटस्य ग्रामजलमूढम् ॥

चोरग्रहेति । चोराख्यो यो ग्रहः तदुक्तस्थले तज्जननम् । प्रश्नकाले यस्मिन् राशौ तिष्ठति तद्राशिकथितस्थले चोरस्य वासः । स्थलैक्ये सति स्थलजननं यत्र तत्रैव स्थितिः ॥

अगाधेति । शशी नगर्याः वनगः अगाधवारिस्थः । नगरीत्युपलक्षणम् । ग्रामाद्यपि । कविः (अ?)गाधजलस्थः वनाद् ग्रामादि गच्छति । असृक् कुज्ञस्य आर्किः अशुचिभूमौ श्मशानादौ वने वा । रविः पर्वते । राहुः वल्मीकादौ । तटं जलान्तिकं अल्पजलस्थलं वा ।

CC-0. In Public Domain. Digitization by eGangotri

द्रेक्काणानां क्रमादेव स्थितिः शयनमासिका ।
मर्त्याकृतिर्दृगाणश्चेदुत्तमस्त्वपरोऽधमः ॥ ३८ ॥

अर्कस्याचो यणिन्दोस्तु शाद्यहेः कादिवर्गकाः ।
कुजशुक्रविदां जीवस्यासितस्य क्रमादिह ॥ ३९ ॥

चत्वारि त्रीण्यपि त्रीणि द्वे द्वे द्वेऽचा च शादयः ।
अजादौ तु तुलादौ तु कादिवर्गे झषे च यण् ॥ ४० ॥

आरूढतत्पतत्स्थर्क्षभागतत्प्रेक्षकस्थिताः ।
बलवांस्तेषु यस्तस्य चौरनामाक्षरं वदेत् ॥ ४१ ॥

मुष्टिहृद्गतनष्टार्थचौरनामाक्षराण्यपि ।

द्रेक्काणानामिति । चोर इत्यर्थः । द्रेक्काणस्वरूपं होरायामुक्तम् । तदेवं कट्यां सितवस्त्रधरः कृष्णः शक्त इवाभिरक्षितुम् इत्यादि होरोक्तम् ॥

अर्कस्येति । अर्कस्याचः षोडश । इन्दोः यण् (ऌ ऽ य)वरल । राहोः शादिक्षान्ताः । कवर्गादयः पञ्चवर्गाः क्रमात् कुजादीनाम् ॥

चत्वारीति । अजे आरूढे अ आ इ ई श । वृषेऽचः त्रीणि उ ऊ ऋ ष इत्यादि । तुलादौ कादयः पञ्चवर्गाः । झषे यण् य र ल व इति ॥

आरूढेति । आरूढादिषु बलवद्वर्णं चोरनामाक्षरम् ॥

मुष्टीति । षट्क तद्युक्तस्तत्पः तन्नाथः तन्नाथस्थराशिः

CC-0. In Public Domain. Digitization by eGangotri

षष्ठतद्द्रष्टृतद्युक्तत्स्थर्क्षांशषट्कृतः ॥ ४२ ॥

स्वाक्षरं निजवर्गस्थैरन्यैस्तद्वर्गपाक्षरम् ।
चरादौ द्वे च चत्वारि त्रीण्यर्णानि तु नामनि ॥ ४३ ॥

नवांशैष्यविनाडिभ्यो मान्देः शतहृता ग्रहाः ।
शिष्टग्रहर्क्षं जनिभं नामाद्यं मासहृद्भपात् ॥ ४४ ॥

मान्दिभेनाबले चन्द्रे चन्द्रभेनान्यथाखिलम् ।
धनेशस्थभदिश्यत्र द्रव्यं दूरं चरादिभिः ॥ ४५ ॥

तन्नाथस्थितनवांश इति षट् ॥

स्वाक्षरमिति । स्व(व)र्गस्थितैः स्वस्याक्षरं अन्यैरन्यवर्गस्थैः व(र्गा?र्गेशा)क्षरं (अ?च)रे आरूढेऽक्षरे चोरनाम्नीत्यादि ॥

नवांशेति । मान्देर्नवांशे ए(ता?ष्या)भ्यो विनाडिभ्यः शतेन लब्धा ग्रहाः । तत्र शताभावे सूर्यः तस्य कृत्तिका सैव चोरस्य जन्मनक्षत्रम् । शतेन हृते शिष्टं चेच्चन्द्रः । द्विशतहृतकुशिष्टं कुज इत्यादि । पुनरपि पूर्वोक्तविनाडिभ्यः मासेन हृता राशयः । तत्र मासोने मेषराशिस्तस्य नाथः कुजस्तस्याक्षरं चोरनामाद्यक्षरमित्यादि । मासहृद्भपात् मासेन हृतशिष्टभं राशिस्तत्पः तन्नाथ इति समासः ॥

मान्दिभेनेति । लक्षणान्तरम् । तत्कालचन्द्रेऽबले सति मान्दिस्थराशिरारूढतया कल्प्यः । चन्द्रे सबले सति चन्द्रस्थराशिरेवारूढराशिः । बलं कलया । तेनाखिलं वाच्यम् । अत्र द्वितीयनाथः यस्मिन् राशौ तद्राशिकथितस्थाने द्रव्यस्थितिः । चरादिना दूरादि ॥

---

१. 'क्तस्त' क. २. 'डी' ख.

CC-0. In Public Domain. Digitization by eGangotri

तृतीयारिपती चोरग्रहावन्तिकदूरगौ ।
लाभे स चेद्धनारीशयोगादिस्तत्कैर्हृतम् ॥ ४६ ॥

शुभाशुभर्क्षेद्दृग्योगा आरूढे प्राप्त्यनाप्तिके ।
शुभेक्षार्थं लभेत् कालेऽन्येक्षा लाभो न वीक्षणम् ॥ ४७ ॥

आरूढगो ग्लौर्बलवान् गुरुभ्यां
दृष्टः शुभो वायगतोऽचिरेण ।
नष्टस्य लाभः श्रुतिवीक्षणाद्यैः
कृष्णीयमालोकय निश्चयाप्त्यै । ४८ ॥

इति त्रयोदशमयनम् ।

तृतीयेति । तृतीयाधिपश्चोरग्रहश्चेद् अन्तिकवासी चोरः षष्ठाधिपश्चेद् दूरवासी स चोरग्रहः लाभ द्वितीयषष्ठाधिपयोगदृष्ट्यादिश्चेत् चोरहृतं धनम् । अन्यथा न हृतमित्यर्थात् ॥

शुभाशुभेति । आरूढं शुभराशिः शुभदृष्टं शुभयुक्तं चेत् नष्टद्रव्यप्राप्तिः स्यात् । अन्यथाऽनाप्तिः । शुभेक्षया कालान्तरेऽर्धलाभः । अन्येक्षा चेद् वीक्षणं भवति अलाभः ॥

आरूढेति । गुरुभ्यां गुरुशुक्राभ्यां एकेन वा आयगतः शुभः नष्टस्य लाभो भवति । लाभ इति पुनरप्यावर्त्य लाभं श्रुतिवीक्षणाद्यैरिति । कृष्णीयशास्त्रे स्पष्टमुक्तम् ॥

इति त्रयोदशमयनम् ।

CC-0. In Public Domain. Digitization by eGangotri

तृतीयोऽङ्कः ।

(ततः प्रविशति विदूषकः ।)

विदूषकः— [विसंस्थुळोदरं विकटं परिक्रम्य] हि हि हि परिपुण्णं मे देवीसमप्पिदेहिं मोदअखंडएहिं ळंबमाणघडिआआरं उदळब्भंतरं फुडदि विअ । अदो पदादो पदं वि गंदुं ण पारेमि । [विचिन्त्य सविषादं] ण मे अज्ज णिद्दापसंगो खणं वि भविस्सदि । जदो वअस्सो ताए पच्चक्खदंसणप्पहुदि खणे खणे अण्णो विअ संपज्जमाणो गहावेसिदो विअ किंवि किंवि असंबद्धं पळवन्तो अज्ज एव्व तं पुणो वि दट्ठुं मं पीडेइ । अहं उण संझं वि विल्लरिअ उत्तरिज्जणिबद्धाइ मोदअखंडाइ खादअमाणो एव्व पुणो वि उववणप्पिआळमूळं पविसिअ तिहुवणळळामभूदं तं ताए सद्धिं वा अण्णेसमाणो जदा ण पेक्खिस्सं तदा एव्व अच्चंदपिपासाकुळदाए विसाचो विअ इदो तदो भमन्तो देवीए मळिळआवाडिआमज्झट्ठिदिग्घिअं ओदरिअ आकंठापीदसाळिळो तक्खणसमापिदसंझो पुणो वि गुळुगुळाअमाणोअळब्भंतरो सणिअं सणिअं इमं संगीदसाळापरिसरं आअदो म्हि । किं करिस्सं । जाव संझापआसो ण विरमइ तदो पुव्वं एव्व वअस्ससमीवं गच्छामि । [इति परिक्रम्य पुरतो विलोक्य सहर्षं] अहो एसा ताए सही विअ विसण्णमुही का वि आअच्छइ [निरूप्य] हंत सही एव्व ताए । [विचिन्त्य] कहं अपरिचिदाए इमाए पुडमदो सळळाओ मह घडिस्सदि । [इति विचिन्तयन् स्थितः ।] (हि हि हि परिपूर्णं मे देवीसमर्पितैर्मोदकखण्डकैर्लम्बमानघटिकाकारमुदराभ्यन्तरं स्फुटतीव । अतः पदात्पदमपि

---

१. 'उअळ' ख २ 'पुडदि' क. ३ 'पळावन्तो' ख.

CC-0. In Public Domain. Digitization by eGangotri

गन्तुं न पारयामि । न मेऽद्य निद्राप्रसङ्गः क्षणमपि भविष्यति । यतो वयस्यस्तस्याः प्रत्यक्षदर्शनात् प्रभृति क्षणे क्षणे अन्य इव सम्पद्यमानो ग्रहाविष्ट इव किमपि किमप्यसंबद्धं प्रलपन्नद्यैव तां पुनरपि द्रष्टुं मां पीडयति । अहं पुनः सन्ध्यामपि विस्मृत्योत्तरीयनिबद्धानि मोदकखण्डानि खादन्नेव पुनरप्युपवनप्रियालमूलं प्रविश्य त्रिभुवनललामभूतां तां तस्याः सखीं वाञ्छिष्यन् यदा न द्रक्ष्यामि तदैवात्यन्तपिपासाकुलतया पिशाच इवेतस्ततो भ्रमन् देव्या मल्लिकावाटिकामध्यस्थितदीर्घिकामवतीर्यांकण्ठापीतसलिलस्तत्क्षणसमापितसन्ध्यः पुनरपि गुळगुळायमानोदराभ्यन्तरः शनैः शनैरिमं सङ्गीतशालापरिसरमागतोऽस्मि । किं करिष्ये । यावत्सन्ध्याप्रकाशो न विरमति ततः पूर्वमेव वयस्यसमीपं गच्छामि । अहो ! एषा तस्याः सखीव विषण्णमुखी काप्यागच्छति । हन्त ! सख्येव तस्याः । कथमपरिचितया अनया प्रथमतः सल्लापो मम घटिष्यति ।)

[ततः प्रविशति चन्द्रलेखा ।]

चन्द्रलेखा — [सविषादं] किं करिस्सं । जस्सिं खणे सहीए सो महप्पा महाराओ पच्चक्खीकिदो तक्खणं आरहिअ सा हि,

गच्छइ पुणो णिवट्टइ पेक्खइ सुण्णं मुहा परिब्भमइ ।
उपविसइ जप्पइ सअं खिज्जइ मुच्छेदि चेदणं ळहइ ॥१॥

एव्वं एक्कं खणं वि कप्पसहस्सं मण्णमाणाए ठावराणं वि सुहोण्णेअचरिदाए ताए देवीपरिअणसमाजावट्ठाणं ण जोग्गं ति मए कुह वि एक्कंदे परहुदिआमेत्तसहाइणिं सहिं णिक्खविअ इदो तदो परिब्भमीआदि । [विचिन्त्य] होदु । महाराअणम्मसइवो पिठरमम्मो ओळोइदव्वो । [इति पुरोऽवलोक्य सविस्मयं] अम्हो एत्थ किं भणामि देव्वाणुऊळत्तणं । जदो सव्वरणमेत्तसण्णिहाणो एसो । [उपसृत्य] अय्य वंदामि । (किं करिष्ये । यस्मिन् क्षणे सख्या स महात्मा महाराजः प्रत्यक्षीकृतः तत्क्षणमारभ्य सा हि

CC-0. In Public Domain. Digitization by eGangotri

* अन्नपूर्णास्तवः

विश्वेश्वरीं वरेण्यां विश्वाश्रयणीं विशिष्टफलदात्रीम् ।
स्तोष्यामि वाञ्छितार्थ्यै स्तोत्रैरन्नाधिनायिकामम्बाम् ॥ १ ॥

काञ्चनरत्नविचित्रां दर्वीं दधतीं तथान्नपात्रं च ।
कष्टदरिद्रार्तिहरामम्बां प्रणतोऽस्मि सम्पदां वृद्ध्यै ॥ २ ॥

सर्वाभिलाषपूरणकल्पकलतिकान्नपूर्णाख्या ।
दारिद्र्यदोषमुग्रं शमयतु सकलार्थबृद्धिदानेन ॥ ३ ॥

अन्नाधिनायिकायाः कृपाघना दुःखघर्मपरितप्ते ।
मयि दारिद्र्यकृणघ्न्या वर्षतु धनधान्यधारया सुचिरम् ॥ ४ ॥

[illegible]रादिर्भुवनाहङ्भवति माहेश्वरीति चान्नान्ते ।
[illegible]ऽग्निवल्लभा स्यादुक्तोऽयं मनुरशेषफलदायी ॥ ५ ॥

[illegible]रुण्याल्लब्धं मन्त्रमिदं दिनमुखेषु भक्तधिया ।
[illegible]ति तस्य सिद्धिर्न दुर्लभा जायते च तापघ्नी ॥ ६ ॥

[illegible]कमलसेवाहृतचित्तः साधकः समाहितधीः ।
[illegible]ाभवदुर्गं विश्रुतकीर्तिप्रभावसौभाग्यः ॥ ७ ॥

[illegible]ध्यानप्रभेदपरिनिष्ठितात्मधीर्मनुजः ।
[illegible]किञ्चनोऽपि त्रिभुवनविख्यातकीर्तिराशिः स्यात् ॥ ८ ॥

[illegible]totra in p[illegible] [illegible]oddes Annapūrṇā is based on
[illegible] No. P. L. 114[illegible]

CC-0. In Public Domain. Digitization by eGangotri

निधिवृन्दमध्यगां त्वां ध्यात्वा मन्त्रं यदा नरो जपति ।
देवि तदास्य निवासं विशन्ति विविधार्थपूरिता निधयः ॥ ९ ॥

दिव्यान्नपूर्णपात्रं दर्वीं च करद्वयेन बिभ्राणाम् ।
ध्यात्वा यदि जपति त्वां प्रपूर्यते तस्य वेश्म धान्यौघैः ॥ १० ॥

यस्मिन् वसति मनुष्यस्तव मन्त्रविशेषजापको देशे ।
तत्र न दीना वाणी प्रवर्तते देवि 'नास्ति नास्ती'ति ॥ ११ ॥

अन्नाद्रिमध्यविस्फुरदम्बुजमध्ये त्रिमण्डलान्तःस्थाम् ।
ध्यायेद्यो दारिद्र्याद्विमुच्यते साधकः स एवाशु ॥ १२ ॥

इन्द्राग्निसोमभास्करवरुणानिलधनदतार्क्ष्यकन्दर्पाः ।
विष्णुविरिञ्चप्रमुखा देवास्त्वद्ध्यानसम्पदा प्रथिताः ॥ १३ ॥

युष्मदपाङ्गघनोऽयं प्रशमितबहुदुःखघर्मतापौघः ।
धारासारधनौघं वर्षतु मयि देवि सर्वदा कृपया ॥ १४ ॥

तव पाणिवल्लवस्था दर्वी दिव्यान्नपूरिता देवि ।
दारिद्र्यदोषमुग्रं शमयतु मम सम्पदां वृद्ध्यै ॥ १५ ॥

वीक्षस्व मामनेकामयदुरितदुरन्तदुःखपरितप्तम् ।
मातर्विभूतिमय्या दिव्यामृतसारधारया दृष्ट्या ॥ १६ ॥

अभिनवभास्करकोटिप्रभासमुद्भासितं हि ते रूपम् । घोर-
हृदयाम्बुजमध्यगतं देवि समाधौ भजन्ति योगीन्द्राः ।

आदौ सृजसि च विश्वं प्रपासि सचराचरं जगद् भुवयः ।
संहरसि लोकमन्ते गुणत्रये सा त्वमेव देव्येका ॥

---

१. 'प्ताम्' Ms.

CC-0. In Public Domain. Digitization by eGangotri

मायोदधिरयमम्ब विषयग्राहोर्मिदारुणो भवति ।
त्वत्तापबाडवाग्नौ सोऽपि च विलयं प्रयाति तच्चित्रम् ॥ १९ ॥

श्रीमद्गुरुप्रसादात्तत्त्वं तव योऽभिवेत्ति लोकेऽस्मिन् ।
देवि स मनुजो लोके पारत्रिकमैहिकं शमभ्येति ॥ २० ॥

हुतभुङ्मण्डलमध्ये विलसितरविबिम्बमध्यगं त्वमृतम् ।
सोमात्मकं विदित्वा देवि त्वद्भावनेन पूतः स्यात् ॥ २१ ॥

गुरुवरपादपवित्रीकृतान्तरात्मा प्रतापयित्वा त्वाम् ।
वि चिदग्नौ दीप्ते योगी योगामृतं जुहोत्येव ॥ २२ ॥

कदापि युष्मद्भक्तो दिव्यामृतमम्ब भावपात्रस्थम् ।
विदित्वा सम्यग् जीवन्मुक्तः स विज्ञेयः ॥ २३ ॥

योगी विजितेन्द्रियारिजितसङ्गः ।
हं प्रविशति योगेशि योगभावितधीः ॥ २४ ॥

[२]गी त्वयाहिधत्ते संवित्तिपदे तदैव परितुष्टिम् ।
हरिरुद्रादीनां गणयति न दानि देव्यनित्यानि ॥ २५ ॥

शत्तत्त्वाख्यं शिवादिभूम्यन्तमम्ब विश्वमिदम् ।
र्बुद्बुदः स्यात् तत्ते संवित्तिमाश्रये धाम ॥ २६ ॥

सूक्ष्मा सूर्यायुतोपमा शक्तिः ।
ं यान्ती या सा त्वमेव शम्भुपदम् ॥ २७ ॥

ात् स्रवन्महाधारया सहोदीप्ता ।
वासं या हि कुळा कुण्डली त्वमेवाम्ब ॥ २८ ॥

Ms. २. 'भि' Ms.

CC-0. In Public Domain. Digitization by eGangotri

जित्वा षट् पञ्च पुनर्निरुध्य दशकं तथैकमवलम्ब्य ।
देवि तव रूपमब्जे हृदयस्थे संयमी स्मरति ॥ २९ ॥

स्थूलं तवाम्ब रूपं योगिमनःपद्मकर्णिकासंस्थम् ।
योगविवृद्धयै सिद्धिं मम दिशतु समस्तवाञ्छितावाप्त्यै ॥ ३० ॥

सूक्ष्मं तवाम्ब रूपं सकलजगत्त्राणकारणोद्भूतम् ।
स्तोष्ये तदेव भक्त्या वाञ्छितसिद्धिप्रदानसुरवृक्षम् ॥ ३१ ॥

श्रीदुर्गा वाग्देवी गिरिजा लिपिमातृका च मातङ्गी ।
त्रिपुरा तथान्नपूर्णा राज्या रमा चेति कीर्तिता मुनिभिः ॥ ३२ ॥

वाग्देवीं वागाप्त्यै दुर्गां भयशान्तये श्रियं भूत्यै ।
आराधयति मनुष्यः पुरुषार्थचतुष्कलब्धये [illegible] ॥ ३३ ॥

[illegible]गपौघः ।
बहुरूपधारिणीं त्वां बहुधा प्रवदन्ति मानवा लोक[illegible]
गुरुमन्त्रदेवतात्मस्वरूपिणीं भावयाम्यहं त्वेकाम् ॥ ३४ ॥

कथमम्ब रूपमाद्यं तव रूपगुणाधिकं च चिन्मात्रम् ।
जानामि देवि तस्माद् दुरुक्तमीशि क्षमस्व तत् सर्वम् ॥ ३५ ॥

दारिद्र्यदुरितदुःखप्रशान्तये व्याहृतं मया स्तोत्र[illegible]श्वत ।
देवि सदा तं जपतां भक्तानां भवतु कामधेनुरूपम् । चोर-
[illegible]गीन्द्रा
स्तोत्रेण त्वं तुष्टा मयोदितेन प्रभूतधनधान्यैः ।
पूरय वेश्म मदीयं विधेहि मयि सन्निधिं प्रपद्ये [illegible] भूद् वयः
॥

CC-0. In Public Domain. Digitization by eGangotri

जित्वा षट् पञ्च पुनर्निरुध्य दशकं तथैकमवलम्ब्य ।
देवि तव रूपमब्जे हृदयस्थे संयमी स्मरति ॥ २९ ॥

स्थूलं तवाम्ब रूपं योगिमनःपद्मकर्णिकासंस्थम् ।
योगविवृद्धयै सिद्धिं मम दिशतु समस्तवाञ्छितावाप्त्यै ॥ ३० ॥

सूक्ष्मं तवाम्ब रूपं सकलजगत्त्राणकारणोद्भूतम् ।
स्तोष्ये तदेव भक्त्या वाञ्छितसिद्धिप्रदानसुरवृक्षम् ॥ ३१ ॥

श्रीदुर्गा वाग्देवी गिरिजा लिपिमातृका च मातङ्गी ।
त्रिपुरा तथान्नपूर्णा राज्या रमा चेति कीर्तिता मुनिभिः ॥ ३२ ॥

वाग्देवीं वागाप्त्यै दुर्गां भयशान्तये श्रियं भूत्यै ।
आराधयति मनुष्यः पुरुषार्थचतुष्कलब्धये [illegible]ः ॥ १३ ॥

[illegible]गपौघः ।
बहुरूपधारिणीं त्वां बहुधा प्रवदन्ति मानवा लोक[illegible]
गुरुमन्त्रदेवतात्मस्वरूपिणीं भावयाम्यहं त्वेकाम् ॥ ३४ ॥

कथमम्ब रूपमाद्यं तव रूपगुणाधिकं च चिन्मात्रम् ।
जानामि देवि तस्माद् दुरुक्तमीशि क्षमस्व तत् सर्वम् ॥ ३५ ॥

दारिद्र्यदुरितदुःखप्रशान्तये व्याहृतं मया स्तोत्र[illegible]श्वत ।
देवि सदा तं जपतां भक्तानां भवतु कामधेनुरूपम् । [illegible]चोर-

[illegible]गीन्द्रा
स्तोत्रेण त्वं तुष्टा मयोदितेन प्रभूतधनधान्यैः ।
पूरय वेश्म मदीयं विधेहि मयि सन्निधिं प्रपद्ये [illegible]भूद् वयः
॥

CC-0. In Public D[illegible]igitization by eGangotri

त्रयोदशमयनम् ।

चन्द्रो गुरुर्वा लग्नस्थ आयुरुद्दिश्य सूर्यजः ।
सप्तमव्ययरन्ध्रेषु पृच्छा चोरहृतं धनम् ॥ १ ॥

लग्नारूढेन्दुकेन्द्रारिकर्क्यन्त्याळ्यंशगः खगः ।
क्रूरो वा व्योम्नि चोरोऽसौ बलोनस्तद्धृतं धनम् ॥ २ ॥

अंशकाज्ज्ञायते द्रव्यं द्रेक्काणैस्तस्कराः स्मृताः ।
राशिभ्यः कालदिग्देशा वयो जातिश्च लग्नपात् ॥ ३ ॥

जातिरूपवयोवेषान् लग्नेशेन दृगाणतः ।
तदीशेनारिणा तत्स्थतन्नाथेक्षितृभिर्वदेत् ॥ ४ ॥

नीचोच्चबन्धुनिजशत्रुगृहांशकेषु
लग्नेक्षको यदि तदादिगृहे धनं च ।

चन्द्र इति । मन्दः सप्तमादौ चेच्चोरहृतं धनमुद्दिश्य पृच्छा ॥

लग्नारूढेति । लग्नादेः केन्द्रे षष्ठे वा तत्र कर्क्यादेरंशे कश्चित् । अन्त्यो मीनः । लग्नादेर्दशमे क्रूरो वा । अत्रांशापेक्षा न । असौ चोरसंज्ञः । एवं चेद् धनं चोरहृतम् । अत्र बलहीन एव चोरः ॥

जातिरूपेति । अरिणा षष्ठेन । एतैः सर्वैः जात्यादि वयः । निसर्गदशोक्तं जातिः 'विप्रादितः शुक्रगुरू' ॥

CC-0. In Public Domain. Digitization by eGangotri

आरूढलग्ननवभागत एव भेद-
मारूढतास्थितादीशि स्थितमेव विद्यात् ॥ ५ ॥

लग्ने चरे दूरगतं चरद्वा
द्वन्द्वे समीपे स्थिरभे स्वगेहे ।
युक्त्यैव लग्नस्थितवीक्षकादि-
रश्मीश्च नाड्यादिषु चिन्तयेच्च ॥ ६ ॥

स्थिरे स्वैश्चरभेऽन्यैश्च द्वन्द्वेऽन्तिकनिवासिभिः ।
हृतं वर्गोत्तमे नूनं दिवा भानौ दिवा निशि ॥ ७ ॥

नीचोबेति । अत्र चोरग्रहः नीचक्षेत्रे नीचांशके वा स्थित्वा लग्नं पश्यति चेद् नीचस्य भवने धनस्थितिरित्यादि । तत्र निजक्षेत्रादौ स्थितश्चेत् स्वगृहे धनम् । न चोरहृतम् । केनापि वस्तुना छन्नम् । अत्र सूर्यश्चोरश्चेत् तदुक्तधान्यधातुवस्त्रादिना इति युक्त्या नवांशेनैव भेदं द्रव्यस्य वदेत् ॥

लग्न इति । चरराशौ लग्ने सति हृतं धनं दूरदेशे चरति । स्थिरे चेत् स्वगृहे स्थितम् । दूरे चेल्लग्नस्थादिरश्मिभिः नाडी-मानम् ॥

स्थिर इति । स्थिरे लग्ने स्वैर्हृतम् । चरेऽन्यैरित्यादि । तत्र वर्गोत्तमे लग्ने निश्चयेन दिवसराशौ चेद् दिवा हृतम् । रात्रिराशौ रात्रौ । सर्वत्र लग्ने एव ॥

CC-0. In Public Do[illegible]gitization by eGangotri

लग्नेऽशा गानलीनस्त्रीयानभुग्नस्तनं धनम् ।
सूर्यादिदृष्टे युक्ते वा योंऽशास्तत्र धनस्थितिः ॥ ८ ॥

कलहार्धवयोयुक्तनार्योर्गेहे कुटीमुखे ।
वेश्यौकसि जले तीरे पाककर्मारयोर्गृहे ॥ ९ ॥

सुन्दरीभवने गोष्ठे पुरोहितसुरौकसोः ।
पतिव्रतागृहे शय्यागृहे चोद्यानवारिणोः ॥ १० ॥

ल(ग्नेशेति ? ग्नेशा इति) । सूर्येण दृष्टे युक्ते वा लग्ने लग्नस्य त्र-(योद ? यो)शाः कल्प्याः गान इति । चन्द्रेण युक्ते दृष्टे वा लीन इति त्रयोऽशा एव । कुजेन स्त्री इति द्वावंशावित्यादि । तत्र लग्ने यावानंश उदेति तेन वक्ष्यमाणस्थले धनस्थितिः ॥

कलहार्धेति । पूर्वोक्ते लग्ने सूर्ययोगादि चेल्लग्नस्य भागत्रिधा कल्प्य एव । तत्र लग्नस्याद्ये भागे उदिते चेत् कलहयुक्तनारीगृहे धन-स्थितिः । द्वितीयेऽर्धवयोयुक्तनारीगृहे । तृतीये भागे कुटीमुखे गृहद्वारा इत्यर्थः । चन्द्रस्य योगादि चेद् आद्ये भागे (तीरे) द्वितीये जले तृतीये वेश्यागृहे इति व्याख्याने(ने)दम् । कुजस्य चेदाद्ये पाकगृहे द्वितीये कर्मारगृहे ॥

सुन्दरीति । बुधस्य योगादि लग्ने चेद् यानमित्येक एव सुन्द-रीभवने एव । गुरोश्चेद् भुग्न इति लग्नस्य चत्वारो भागाः । तत्राद्ये गोष्ठे । द्वितीये पुरोहितगृहे । तृतीये सुरगृहे । चतुर्थे पतिव्रतागृहे । शुक्रस्य चेत् षड् भागाः । आद्ये शय्यागृहे । द्वितीये उद्याने । तृतीये वारिणि ॥

CC-0. In Public Do

रामागन्धसुमौकस्सु शनेर्वृद्धाबलागृहे ।
भिन्नपात्रामिषामत्रपाकेषु च यथाक्रमम ॥ ११ ॥

मेषादेरजगोचरौ विजनशय्यागारकर्किस्थले
दावः सस्यजलान्वितं च वणिजां स्थानानि रन्ध्राणि च ।
युद्धोर्वीवनवार्युपस्थलनिषादौकांसि कुम्भस्य तत्-
कर्त्रागारमहानसे च जलभूदेवामरौकांसि च ॥ १२ ॥

सा मे प्रिया च ते हे वा सा लोके नित्य मे मया ।
मेषादौ द्रव्यसङ्ख्या स्याद् यातनाडीहतापि वा ॥ १३ ॥

स्वर्णवर्णासितौ स्वर्णपिङ्गलौ कद्रुकर्बुरौ ।
बभ्रुकृष्णौ हिरण्याभश्यामलौ क्रमतः स्मृताः ॥ १४ ॥

रामागन्धेति । रामागृहादि शुक्रस्य । शनेश्चेद् वृद्धाबला-गेहादिषु ॥

मेषादेरिति । मेषलग्ने अजचरः देशः । वृषे गवाम् । मिथुने विजनशय्यागारे । कर्किणि कर्कटसञ्चारयोग्यं स्थलम् । सिंहे वनम् । कन्यायां स(स्यं अम्ब?स्यज)लयोः समीपम् । चापे युद्धोर्वी । तत्कर्ता कुम्भकारः । भूदेवगृहम् अमरगृहम् । लग्नयुक्ते ग्रहवीक्षकग्रहस्फुटदृष्टि-समसेव लग्नस्फुटे चेत् तत्तत्स्थानं निश्चयेन ॥

सा मे इति । मेषे लग्ने सा सप्तसङ्ख्या द्रव्यस्य । तत्काल-नाडीहता सप्त सङ्ख्या वा इत्यादि ॥